# युवमहोत्सवः-2010

## अन्तःपरिसरीयस्पर्धा

27-28 दिसम्बर्

गुरुवायूरु-परिसरः

## मार्गदर्शिका


राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनम्)

मानितविश्वविद्यालयः

नवदेहली

# उद्देश्यम्

- छात्राणां रचनात्मक-कलात्मक-सांस्कृतिकाभिरुचीनां प्रोत्साहनम्।
- छात्रेषु राष्ट्रियैक्यस्य साम्प्रदायिकसौहार्दस्य परस्परं बन्धुभावस्य च विकासः।
- छात्रेषु संस्कृताभिरुचिजागरणम्।
- राष्ट्रस्तरे संस्कृतस्य सम्यक् प्रचारः प्रसारश्च।
- स्वकीयक्षेत्रस्य राज्यस्य देशस्य सांस्कृतिकरिक्थस्य च अभिज्ञानार्थं तत्संवर्धनार्थञ्च युवभ्यः अवसरप्रदानम्
- छात्राणां साहित्य-सङ्गीत-कला-चित्राङ्कन-रङ्गमञ्च-क्रीडादिविषयक-प्रतिभानां विकासाय प्रकृष्टस्य राष्ट्रियमञ्चस्य निर्माणम्।
- सामाजिकराष्ट्रियोद्देश्यपरिपूरणार्थं छात्राणां सर्जनात्मकोर्जायाः सद्विनियोगः।

❖ ❖

# नियमावलिः

- राष्ट्रियसंस्कृतसंस्थानस्य कस्मिंश्चिदपि परिसरे नियमितरूपेण पठन् छात्रः/पठन्ती छात्रा (परिसरीयस्पर्धासु प्रथमादिस्थानाधिकारी/ प्रथमादिस्थानाधिकारिणी सम्बद्धविधायाम्) युवमहोत्सवे अन्तःपरिसरीयस्पर्धासु भागं ग्रहीतुमर्हति।
- स्पर्धावर्षे जुलाईमासे प्रथमे दिनाङ्के तेषां/तासां (छात्राणां) वयः पञ्चविंशतिवर्षेभ्यः अधिकं न स्यात्।
- युवमहोत्सवेऽस्मिन् भूतपूर्वच्छात्रेभ्यः भागग्रहणावसरः नैव वर्तते।
- स्नातकस्तरे पूरकपरीक्षामाध्यमेन अग्रिमकक्षां प्रविष्टाः छात्राः युवमहोत्सवे भागग्रहणार्थम् अर्हाः सन्ति। परन्तु पूरकपरीक्षायाम् अनुत्तीर्णः जाते सति छात्रः स्पर्धार्थम् अनर्हः भविष्यति।
- कस्यचित् छात्रस्य परीक्षापरिणामः लम्बितश्चेत् परीक्षाफलघोषणापर्यन्तं सः नियमितछात्रत्वेन परिगण्यते।
- युवमहोत्सवस्य प्रतिभागिनां समीपे परिसरप्राचार्येण प्रदत्तं परिचयपत्रम् अवश्यं स्यात्। प्रतिभागिनां भावचित्रम् तत्सम्बद्धप्रपत्राणि च परिसरप्राचार्येण हस्ताक्षरितानि भवेयुः।
- सर्वविधस्पर्धासु प्रतिभागिनां सहयोगिनां शिक्षकाणां च सङ्ख्या निर्धारिता वर्तते। सर्वेऽपि परिसराः निर्धारितसङ्ख्यानुसारेणैव प्रतिभागिनः निश्चिनुयुः।
- दिशानिर्देशे सूचितसङ्ख्याम् अतिक्रम्य समायाताः प्रेषिता वा छात्राः स्पर्धायै नानुमन्यन्ते।
- कार्यक्रमस्थले/आयोजनस्थले केवलं निर्दिष्टप्रतिभागिभ्यः सहयोगिभ्यश्च भोजनावासव्यवस्था कल्पिता वर्तते। तदतिरिच्य आगतवतां जनानां भोजनावासव्यवस्था न कल्प्यते।

- मार्गदर्शिकायाम् उल्लिखितनिर्देशानुसारेणैव आयोजकपरिसरः स्पर्धानाम् आयोजनं कुर्यात्।
- युवमहोत्सवे भागं गृह्णता परिसरेण एकैकं वस्त्रफलकम् अवश्यमेव आनेतव्यम्।
- परिसरीयगणप्रमुखत्वेन समागतः अध्यापकः एकं ध्वजं आयोजकपरिसराय प्रयच्छेत्। स च ध्वजः स्पर्धान्ते तस्मै प्रत्यर्पयिष्यते।
- परिसरस्य नामोल्लेखयुतस्य वस्त्रफलकस्योपयोगः शोभायात्रासन्दर्भे भविष्यति।
- सङ्गीतस्पर्धानां प्रतिभागिभिः सह वादकद्वयम् आगन्तुमर्हति।
- एकैकस्मात् परिसरात् संरक्षकत्वेन अध्यापकद्वयं (एका महिला एकः पुरुषः च) समागच्छेत्।
- विभिन्नस्पर्धासु निर्णायकानां निर्णयः अन्तिमः सर्वमान्यश्च भविष्यति।
- कस्याञ्चिदपि स्पर्धायां जातिभाषाधर्मसम्प्रदायविषयकाक्षेपः सर्वथा निषिद्धः वर्तते।
- इयं नियमावलिः केवलं राष्ट्रियसंस्कृतसंस्थानस्य अन्तःपरिसरीय-युव-महोत्सवस्य कृते वर्तते।
- अग्रिमपृष्ठेषु एकैकस्याः स्पर्धायाः नियमाः मूल्याङ्कनप्रकाराश्चोल्लिखिताः वर्तन्ते।

# अनुशासनम्

- प्रतिभागिभिः अवधानेन सर्वेऽपि नियमाः पठनीयाः।
- युवमहोत्सवेऽस्मिन् भागं वहन्तः प्रतिभागिनः निष्ठया स्पर्धानियमान् पालयेयुः।
- सर्वासु स्पर्धासु निर्णायकस्य निर्णयः एव सर्वमान्यः भविष्यति। तेषां निर्णयस्य आदरः स्यात्।
- महोत्सवसन्दर्भे कश्चन प्रतिभागी अनुचितं व्यवहरिष्यति चेत् तदर्थम् अनुशासनात्मकाचारः विधास्यते। दोषी प्रतिभागी भविष्ये कदाचिदपि कस्याञ्चिदपि स्पर्धायां भागं वोढुं नैव समर्थो भविष्यति।

♦♦♦

# प्रतिज्ञा

प्रतिजानीमहे यद् वयं राष्ट्रियसंस्कृतसंस्थानस्य युवमहोत्सवे सनिष्ठं भागं गृह्णानाः सश्रद्धं तन्नियमान् च परिपालयन्तः सत्क्रीडाभावनया संस्थानस्य सांस्कृतिकायोजनानां क्रीडाणाञ्च गौरवं संवर्धयिष्यामः।

# विषयानुक्रमः

**विषयः**
**पृष्ठसङ्ख्या**


| | |
|---|---|
| उद्देश्यम् | 2 |
| नियमावलिः | 3 |
| अनुशासनम् | 5 |
| प्रतिज्ञा | 5 |
| **क. शैक्षिकस्पर्धा** | |
| 1. संस्कृतसुभाषितकण्ठपाठः | 8 |
| 2. वादविवादस्पर्धा | 8 |
| 3. स्पूर्तिस्पर्धा (Quiz Competition) | 8 |
| 4. साहित्यरचना | 9 |
| 5. सङ्गणकीयसंस्कृतस्पर्धा | 9 |
| **ख. चित्रस्पर्धा** | |
| 1. आशुचित्रणम् | 10 |
| 2. व्यङ्ग्यचित्रम् | 10 |
| 3. भित्तिपत्रकम् | 10 |
| 4. रङ्गवल्ली | 11 |
| **ग. सांस्कृतिकस्पर्धा** | |
| 1. एककसंस्कृतगीतम् | 11 |
| 2. एककशास्त्रीयगायनम् | 11 |

3. एककशास्त्रीयवादनम् 11

4. एककशास्त्रीयनृत्यम् 12

5. एकपात्राभिनयः 13

6. सङ्घनृत्यम् (Group Dance) (बालिकानां कृते) 13

**घ. क्रीडास्पर्धा**

1. योगासनम् (*Yogasanam*) 14

2. 100 मीटरधावनम् 14

3. 200 मीटरधावनम् 14

4. 400 मीटरधावनम् 14

5. 800 मीटरधावनम् (केवलं बालकानां कृते) 14

6. 1500 मीटरधावनम् (केवलं बालकानां कृते) 14

7. दीर्घकूर्दनम् (Long Jump) 14

8. उच्चकूर्दनम् (High Jump) 14

9. गोलकक्षेपणम् (Shot put) 14

10. चक्रक्षेपणम् (Discus throw) 14

11. कुन्तक्षेपणम् (Javaline throw) (केवलं बालकानां कृते) 15

12. बैडमिण्टन् (Badminton) 15

13. हस्तकन्दुकम् (Volleyball) (केवलं बालकानां कृते) 15

14. म युद्धम् (Wrestling 50,55,60,66,74)(केवलं बालकानां कृते) 15

15. कबड्डी (Kabaddi) (केवलं बालकानां कृते) 16

16. चतुरङ्गम् (Chess) 16

17. खो-खो (बालिकानां कृते) 16

## क. शैक्षिकस्पर्धा

### 1. सुभाषितकण्ठपाठस्पर्धा

- एकस्मात् परिसरात् द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- एकस्मै प्रतियोगिने अधिकाधिकं (5) पञ्चनिमेषाः निर्धारिताः सन्ति।
- स्पर्धायामस्यां यत् किमपि सरसं सुन्दरञ्च पद्यं प्रस्तोतुं शक्यते।

### 2. वाद-विवादस्पर्धा

- स्पर्धायामस्याम् प्रतिपरिसरं द्वौ प्रतिभागिनौ भवितुमर्हतः। एकः पक्षे अपरश्च विपक्षे स्वीयं मतमुपस्थापयेत्।
- संस्कृतमाध्यमेनैव विचारोपस्थापनं करणीयम्।
- वादविवादस्पधार्याः विषयः चतुर्विंशतेः (24) होराभ्यः प्राक् कार्यक्रमस्थले एव उद्घोषयिष्यते।
- एकस्मै प्रतियोगिने अधिकाधिकं दश (10) निमेषात्मकः समयः निर्धारितः वर्तते।

### 3. स्पूर्तिस्पर्धा (Quiz Competition)

- स्पूर्तिस्पर्धायां प्रतिपरिसरं द्विसदस्यात्मकः एकः गणः भागं स्वीकर्तुमर्हति।
- स्पर्धेयं **चक्रकद्वयात्मिका** भवति।
- **प्रथमचक्रके** दश पर्यायाः भवन्ति।
- प्रतिपर्यायं प्रतिगणम् एकैकः प्रश्नः भवति।
- प्रश्नाः पर्यायेण इत्थं भवन्ति–

  १. वेदः २. न्यायः ३. व्याकरणम् ४. वेदान्तः ५. साहित्यम् ६. ज्योतिषम् ७. क्रीडा ८. राजनीतिः ९. भारतम् १०. आधुनिकसंस्कृतरचनाः ।
- **द्वितीयचक्रकं** भवति आशुप्रश्नात्मकम् (Rapid Fine Round ) ।

- अत्र प्रतिगणं पञ्चदश प्रश्नाः भवन्ति।
- अस्मिन् चक्रके साधूत्तरस्य कृते द्वौ अङ्कौ योज्येते।
- असाधूत्तरस्य कृते एकः अङ्कः वियोज्यते।
- अत्र प्रश्नाः अधोनिर्दिष्टविषयेभ्यः प्रतिविषयम् एकः प्रश्नः इति क्रमेण प्रतिगणं पञ्चदश प्रश्नाः भवन्ति।

  **विषयाः**– १. काव्यम् २. कविः ३. शब्दरूपम् ४. धातुरूपम् ५. वेदः ६. नाटकम् ७. ध्येयवाक्यम् ८. संस्कृतसंस्थाः ९. दर्शनम् १०. छन्दः ११. पादपूरणम् १२. तिथिः/वासरः/नक्षत्रम्/संवत्सरः १३. रामायणम्/महाभारतम् १४. समसामयिकविषयाः १५. पुरस्कारः।
- समयादिविषयका अन्याः सूचनाः स्पधार्याः आरम्भे प्रदास्यन्ते।
- प्रश्नोत्तरं संस्कृतभाषया एव भविष्यति।

## 4. साहित्यरचना

- साहित्यरचनास्पर्धायाम् एकस्य परिसरस्य द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- साहित्यरचना (गद्यं/पद्यं) संस्कृतमाध्यमेन करणीया।
- इयं स्पर्धा एकहोरात्मिका (1घण्टात्मिका) भविष्यति।
- स्पर्धारम्भात् त्रिंशतः (30)निमेषेभ्यः प्राक् स्पर्धाविषयस्य उद्घोषणा भविष्यति।

## 5. सङ्गणकीयसंस्कृतस्पर्धा

- प्रत्येकं परिसरात् एकः प्रतिभागी भागं स्वीकर्तुमर्हति।
- एकस्मै प्रतियोगिने सङ्गणकोपरि कार्यं कर्तुं त्रिंशत् (३०) निमेषात्मकः कालः प्रदीयते।
- Unicode अक्षरम् (font) उपयुज्य संस्कृते सञ्चिकानिर्माणं (file making),
- प्रोग्रामिंग्–करणम् (C, C++,Java,Visual Basic,Visual foxpro,etc),
- अन्वेषणतन्त्रस्य (search engine)प्रयोगः
- लिंक्स्–इत्यस्य उपयोगश्च अत्र कर्तव्याः भवन्ति।

## ख.चित्रस्पर्धा

### 1. आशुचित्रणम्

- आशुचित्रणे प्रतिपरिसरं द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- आशुचित्रणं संस्कृतसाहित्यस्य कस्यचित् प्रसङ्गविशेषस्याधारेण भविष्यति। स च प्रसङ्गः स्पर्धास्थले एव सूचयिष्यते।
- स्पर्धाकालः अधिकाधिकं सार्धहोराद्वयात्मकः (2½ घण्टा) भविष्यति।
- चित्रणार्थं पत्रस्याकारः 22" × 15" निर्धारितः वर्तते। तच्च पत्रकम् आयोजकपरिसरेण कार्यक्रमस्थले एव प्रदास्यते।
- चित्राङ्कणार्थं सर्वविधसामग्र्यः स्पर्धिना स्वयमानेतव्याः।

### 2. व्यङ्ग्यचित्रम्

- व्यङ्ग्यचित्रस्पर्धायाम् एकैकस्य परिसरस्य द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- व्यङ्ग्यचित्रनिर्माणार्थं विषयः (लिखितरूपेण/मौखिकरूपेण) स्पर्धास्थले सूचयिष्यते। तदनुसारेण चित्रं निर्मेयम्।
- अस्याः स्पर्धायाः कृते अधिकाधिकं सार्धघण्टाद्वयात्मकः कालः (2½ घण्टा) निर्धारितः वर्तते।

### 3. भित्तिपत्रकम्

- भित्तिपत्रकनिर्माणस्पर्धायाम् एकस्य परिसरस्य द्वौ प्रतिभागिनौ भागं स्वीकरिष्यतः।
- भित्तिपत्रकनिर्माणार्थं प्रसङ्गस्य घोषणा स्पर्धास्थले एव करिष्यते। तदवगत्य प्रतिभागिभिः भित्तिपत्रकं निर्मातव्यम्।
- स्पर्धायाः कालः अधिकाधिकः सार्धहोराद्वयात्मकः (2½ घण्टा) भविष्यति।
- प्रतिभागिनां कृते चित्रनिर्माणपत्रकम् (Paper Size 22" × 15") आयोजकपरिसरेण प्रदास्यते।
- अन्यसामग्र्यः प्रतिभागिभिः स्वयमानेतव्याः।

## 4. रङ्गवल्लीस्पर्धा

- अस्यां स्पर्धायाम् प्रतिपरिसरं द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- स्पर्धायाः समयः सार्धहोराद्वयात्मकः (2½ घण्टा) भविष्यति।
- रङ्गवल्ली निर्मातुं समग्रसामग्र्यः छात्रैः स्वयम् आनेतव्याः।
- प्रतिभागी रङ्गवल्ल्याः माध्यमस्य आकारस्य च चयनं स्वेच्छया कर्तुं शक्ष्यति।
- रङ्गवल्ली वर्णनात्मिका चित्रात्मिका वा स्यात्।
- मुक्तचित्रणमपि भवितुमर्हति।

### ग. सांस्कृतिकस्पर्धा

## 1. एकक-संस्कृतगीतस्पर्धा

- एकस्मात् परिसरात् द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- द्वौ वादकौ अधिकाधिकं भवितुमर्हतः।
- गायनार्थम् अवधिः 5 निमेषात्मकः भविष्यति।
- संस्कृतगीतभजनादिकं (चलच्चित्रगीतानि विहाय) गेयम्।
- स्वरतालसमन्वयपुरस्सरं सम्पूर्णप्रभावस्याधारेण निर्णयः भविष्यति।

## 2. एकक-शास्त्रीयगायनम्

- एकस्य परिसरस्य पक्षतः द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- द्वौ वादकौ अधिकाधिकं भवितुमर्हतः।
- केवलं संस्कृतगीतानां गानमेव अनुमन्यते।
- स्वरतालसमन्वयपुरस्सरं सम्पूर्णप्रभावस्याधारेण निर्णयः भविष्यति।
- गायनस्य कृते 15 निमेषात्मकः कालः निर्धारितः वर्तते।

## 3. एकक-शास्त्रीयवादनस्पर्धा

- एकस्य परिसरस्य द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- द्वौ वादकौ अधिकाधिकं भवितुमर्हतः।
- स्पर्धिनः वाद्ययन्त्रं स्वयमानयेयुः।
- ताल-वाद्यादि-सम्पूर्णप्रभावस्याधारेण निर्णयः भविष्यति।
- पाश्चात्त्यवाद्येषु हारमोनियम-वायोलिन इत्यनयोः वाद्ययोः प्रयोगः एवानुमतः वर्तते।
- गीटार- Synthesizer-Moutherorgan प्रभृतिवाद्यानामुपयोगः सर्वथा वर्जितः वर्तते।
- अस्याः स्पर्धायाः कृते 15 निमेषात्मकः कालः निर्धारितः वर्तते।ग. सांस्कृतिकस्पर्धा

## 4. एकक-शास्त्रीयनृत्यम्

- स्पर्धायामस्यां प्रत्येकं परिसरात् द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।
- द्वौ वादकौ अधिकाधिकं भवितुमर्हतः।
- कथक्कली-कूचिपुडी-मणिपुरी-ओडिसी-भरतनाट्यादि-भारतीयशास्त्रीय-नृत्यविधानाम् एव प्रदर्शनम् अनुमन्यते। नृत्यगीतं संस्कृतेन एव भवेत्।
- नृत्यस्य ताल-लय-भाव-मुद्रा-वेषभूषा-अभिनय-पदसञ्चालनादिकं समग्र-प्रभावम् आधारीकृत्य निर्णयः भविष्यति।
- पञ्जीकरणसमये नृत्यस्य महत्त्वं, कथायाः सङ्क्षिप्तवृत्तं गेयं गीतञ्च विलिख्य (प्रतिकृतित्रयम्) प्रतिभागिना प्रदेयम्।
- अस्याः स्पर्धायाः कृते 15 निमेषात्मकः कालः निर्धारितः वर्तते।

## 5. एकपात्राभिनयः

- एकपात्राभिनये एकैकस्मात् परिसरात् एकः प्रतिभागी भागं स्वीकर्तुमर्हति।
- इयं स्पर्धा दश (10)निमेषात्मिका भविष्यति।
- सहायकः/वादकः एकः भवितुमर्हति।

## 6. सङ्घनृत्यम् (Group Dance) (बालिकानां कृते)

- प्रत्येकं परिसरात् एकः गणः अनुमन्यते।
- नृत्यगणे सदस्यानां संख्या पञ्चभ्यः (5) सप्त-(7) पर्यन्तं भवितुमर्हति।
- अधिकाधिकं द्वौ सहायकौ अनुमन्येते।
- प्रत्येकं गणाय पञ्चदशनिमेषात्मकः (15) कालः प्रदास्यते।
- प्रत्येकं गणः प्रदत्ते समये विविधशास्त्रीयविधानां जनपदविधानाञ्च नृत्यप्रदर्शनं कर्तुं प्रभवति।
- नृत्ये प्रयुज्यमानं गीतं कयाचित् भाषयापि भवितुमर्हति।
- लय-ताल-नृत्य-वेशभूषादीनाम् आधारेण निर्णयः भविष्यति।
- पञ्जीकरणसमये नृत्यस्य महत्त्वं, विषयस्य संक्षिप्तवर्णनञ्च संस्कृतेन विलिख्य प्रतिकृतित्रयं देयम्। तथा च नृत्ये प्रयुज्यमानं गीतमपि देवनागरी-लिप्या विलिख्य प्रतिकृतित्रयं प्रदेयं वर्तते।

## घ. क्रीडास्पर्धा

### 1. योगासनम् (Yogasanam)

➢ सर्वेभ्यः परिसरेभ्यः एकैकः स्पर्धी भागं स्वीकर्तुं प्रभविष्यत्यस्यां स्पर्धायाम्।

### ● धावनस्पर्धा (Race)

| | बालकानां कृते | बालिकानां कृते |
|---|---|---|
| 2. | 100 मीटरधावनम् | 100 मीटरधावनम् |
| 3. | 200 मीटरधावनम् | 200 मीटरधावनम् |
| 4. | 400 मीटरधावनम् | 400 मीटरधावनम् |
| 5. | 800 मीटरधावनम् | |
| 6. | 1500 मीटरधावनम् (एकमीलमितं धावनम्) | |

### ● कूर्दनस्पर्धा (Jump)

| | बालकानां कृते | बालिकानां कृते |
|---|---|---|
| 7. | दीर्घकूर्दनम् | दीर्घकूर्दनम् |
| 8. | उच्चकूर्दनम् | उच्चकूर्दनम् |

### ● क्षेपणस्पर्धा (Throw)

| | बालकानां कृते | बालिकानां कृते |
|---|---|---|
| 9. | गोलकक्षेपणम् | गोलकक्षेपणम् |
| 10. | चक्रक्षेपणम् | चक्रक्षेपणम् |

### 11. कुन्तक्षेपणम्

धावन-कूर्दन-क्षेपण-स्पर्धासु प्रत्येकं परिसरात् द्वौ प्रतिभागिनौ भागं स्वीकर्तुमर्हतः।

## 12. बैड्मिन्टन्-स्पर्धा (Badminton)

- अस्यां स्पर्धायां द्वे एककस्पर्धे एका च युगलस्पर्धा भविष्यन्ति।
- एकस्मात् परिसरात् क्रीडालुद्वयं भागं स्वीकर्तुमर्हति।

## 13. हस्तकन्दुकस्पर्धा (Volley ball)

- एकैकस्मात् परिसरात् एकः क्रीडागणः (पुरुषाणां) भागं ग्रहीष्यति। प्रत्येकस्मिन् गणे अष्टौ (8) क्रीडालवः भवेयुः।

## 14. मल्लयुद्धम् (Wrestling)

- अस्यां स्पर्धायां भारानुसारेण पञ्च वर्गाः (पुरुषाणां) भविष्यन्ति।
  - प्रथमः वर्गः - 50 किलोग्राममितानां
  - द्वितीयः वर्गः - 55 किलोग्राममितानां
  - तृतीयः वर्गः - 60 किलोग्राममितानां
  - चतुर्थः वर्गः - 66 किलोग्राममितानां
  - पञ्चमः वर्गः - 74 किलोग्राममितानां
- यस्य छात्रस्य 66 किलोग्राममितादधिकः भारः अस्ति तस्यापि समावेशः 74 किलोग्राममिते समूहे भविष्यति। एवमेव इतरवर्गेष्वपि निश्चीयते।

## 15. कबड्डी (Kabaddi)

- स्पर्धायामस्यां एकैकस्मिन् गणे नव छात्रा: (9) (पुरुषा:) भविष्यन्ति।
- सर्वेभ्य: परिसरेभ्य: एकैक: गण: भागं वक्ष्यति।

## 16. चतुरङ्गम् (Chess)

- स्पर्धायामस्यां प्रत्येकं परिसराद् एक: प्रतिभागी भागं स्वीकर्तुमर्हति।
- अपर: प्रतिभागी अन्यस्यां स्पर्धायां भागं ग्रहीतवान् चेत् सोऽपि भागं ग्रहीतुं शक्ष्यति।

## 17. खो-खो (बालिकानां कृते)

- प्रत्येकं परिसरात् एक: गण: भागं ग्रहीष्यति।
- प्रत्येकं गणे द्वादश (12) सदस्या: भवेयु:।
- तेषु नव (9)संख्याका: क्रीडन्ति त्रयश्च आरक्षिता: भवन्ति।
- प्रत्येकं गण: नव (9)निमेषात्मककालत्वेन पर्यायद्वयं क्रीडति।
- धावक-अनुधावकनिर्णय: गुटिकापातेन (lottery द्वारा) भविष्यति।
- उपविष्टम् अनुधावकं प्रति ''खो'' शब्दं स्पष्टतया वदेत्।
- ''खो'' शब्दे उक्ते सत्येव अनुधावक: उत्तिष्ठेत्।
- नियमविरुद्धे धाविते सति अनुधावक: तस्यां दिशि एव धावेत् यस्यां दिशि तेन धावनम् आरब्धम्।
- प्रत्येकम् अनुधावक: स्वपरिधौ अनुधावकान्तरस्य विरुद्धदिशि उपविशेत्।

- नवमः अनुधावकः कस्यचन स्तम्भस्य निकटे विद्यमानपरिधौ तिष्ठति।
- उपविष्टस्य अनुधावकस्य शरीरं मध्यमार्गं (Central lane इत्याख्यं) न स्पृशेत्।
- अनुधावकः चितायां दिशि एव अन्तिमदीर्घचतुरस्रं यावत् धावितुमर्हति।
- ''खो'' शब्दं विना अनुधावकः मध्यमार्गस्य (Central lane इत्यस्य) अपरं पार्श्वं न गच्छेत्।
- द्वौ पादौ सीमोल्लङ्घितौ भवतश्चेत् अनुधावकः निष्कासितो (out) भविष्यति।